# १ कनकाम्बरि

## रागाङ्ग रागं १: कनकाम्बरि
## तिस्र जाति एक ताळं

पल्लवि

कनकाम्बरि कारुण्यामृतलहरी
कामाक्षि मामव कामेश्वरी

अनुपल्लवि

दिनकरचन्द्रतेजःप्रकाशकरी
देवि महात्रिपुरसुन्दरि शङ्करी

चरणम्

त्रैलोक्यमोहनादिचक्रेश्वरी

त्रैपदपरब्रह्ममहिषि भास्वरी

सालोकादिमुक्तिप्रदानकरी

सदाशिवकरि गुरुगुहोदयकरी

मूलादिनवाधारेश्वरि शुभकरी

नीलालकधरि नित्यानन्दकरी

लीलाविश्वोत्पत्तिस्थितिलयकरि
बाला परमेश्वरि पञ्चदशाक्षरि

✠ ✠ ✠ ✠ ✠

# २ श्रीदक्षिणामूर्तिमीशम्

## रागाङ्ग रागं २: फेनद्युति
## आदि ताळं

पल्लवि

श्रीदक्षिणामूर्तिमीशं चित्प्रकाशं प्रणौमि

अनुपल्लवि

वेदान्तवेद्यं न्यग्रोधवृक्षमूलवासिनं

वल्लकीनादानुभवमोदममृतफेन-
द्युतिमन्दस्मितमुखाम्बुजम्

चरणम्

जननादिखेदभञ्जनचतुरं

जगदिन्द्रजालचमत्कृतिकरं

मुनिजनादिनिखिलसंशयहरं

मुद्राकरं गुरुगुहाकरम्

अनाद्यविद्यातमोभास्करं

आचार्यशेखरं सुन्दरं

मनोवागगोचरं शशिधरं
मौनिनं मदनहरं शङ्करम्

✠ ✠ ✠ ✠ ✠

# ३ बृहदीश्वरो रक्षतु

## रागाङ्ग रागं ३: गानसामवराळि
## तिश्र जाति एक ताळं

पल्लवि

बृहदीश्वरो रक्षतु मां
हरिब्रह्मेन्द्रपूजितस्सततम्

अनुपल्लवि

बृहन्नायकीसहितानन्दयुतो

भ्रान्तिस्वरूपप्रपञ्चातीतो

सहजगानसामवराळिविनुतो
सदाशिवो विनतगणेशगुरुगुहो

✠ ✠ ✠ ✠ ✠

# ४ बृहदम्बा मदम्बा

## रागाङ्ग रागं ४ : भानुमति
## आदि ताळं

पल्लवि

बृहदम्बा मदम्बा जयति
ब्रह्माण्डस्वरूपजगदम्बा

अनुपल्लवि

महादेवयुवती भानुमती

मद्गुरुगुहजननी निरञ्जनी

महेश्वरी राजराजेश्वरी
महात्रिपुरसुन्दरी शङ्करी

✠ ✠ ✠ ✠ ✠

# ५ गुरुगुहस्वामिनि

## रागाङ्ग रागं ४ : भानुमति
## खण्ड जाति त्रिपुट ताळं

पल्लवि

गुरुगुहस्वामिनि भक्तिं करोमि
निरुपमस्वेमहिम्नि परंधाम्नि

अनुपल्लवि

करुणाकरचिदानन्दनाथात्मनि

करचरणाद्यवयवपरिणामात्मनि

तरुणोल्लासादिपूजितस्वात्मनि
धरण्याद्यखिलतत्वातीतात्मनि

चरणम्

निजरूपजितपावकेन्दुभानुमति

निरतिशयानन्दे हंसो विरमति

अजशिक्षणरक्षणविचक्षणसुमति
हरिहयादिदेवतागणप्रणमति

यजनादिकर्मनिरतभूसुरहिते

यमनियमाद्यष्टाङ्गयोगविहिते

विजयवल्लीदेवसेनासहिते
वीरादिसन्नुते विकल्परहिते

✠ ✠ ✠ ✠ ✠

# ६ बालाम्बिके पाहि

## रागाङ्ग रागं ५ : मनोरञ्जनि
## मध्य ताळं

पल्लवि

बालाम्बिके पाहि भद्रं देहि देहि

अनुपल्लवि

सालोकादिमुक्तिसाम्राज्यदायिनि

शङ्करनारायणमनोरञ्जनि धनिनि
नीलकण्ठगुरुगुहनित्यशुद्धविद्ये

✠ ✠ ✠ ✠ ✠

# ७ चिदम्बरनटराजमूर्तिम्

## रागाङ्ग रागं ६: तनुकीर्ति
## मिश्र जाति एक तालं

पल्लवि

चिदम्बरनटराजमूर्तिं
चिन्तयाम्यतनुकीर्तिम्

अनुपल्लवि

मदम्बाशिवकामीपातिं

मदनजनकमहितपशुपतिम्
वदनकमलगुरुगुहविनुतिम्

✠ ✠ ✠ ✠ ✠

# ८ ज्ञानाम्बिके

## रागाङ्ग रागं ७: सेनाग्रणि
## तिश्र जाति एक ताळं

पल्लवि

ज्ञानाम्बिके पालय मां श्री
ज्ञातृज्ञानज्ञेयस्वरूपिणि

अनुपल्लवि

सेनाग्रणिप्रमुखोपासिते

सितासिते अखिलदेवतासेविते

ज्ञानप्रदगुरुगुहविज्ञानघने घनजघने
दीनावनकोङ्कणेशदिव्यललने शोभने

✠ ✠ ✠ ✠ ✠

# ९ कमलाम्बिके

## (नवावरणध्यानकीर्तनम्)

## रागाङ्ग रागं ८: जनतोडि
## रूपक ताळं

पल्लवि

कमलाम्बिके आश्रितकल्पलतिके चण्डिके
कमनीयारुणांशुके करविधृतशुके मामव जददम्बिके

अनुपल्लवि

कमलासनादिपूजितकमलपदे बहुवरदे
कमलालयतीर्थवैभवे शिवे करुणार्णवे

चरणम्

सकललोकनायिके सङ्गीतरसिके

सुकवित्वप्रदायिके सुन्दरि गतमायिके

विकळेबरमुक्तिदाननिपुणे अघहरणे

वियदादिभूतकिरणे विनोदचरणे अरुणे

सकळे गुरुगुहकरणे सदाशिवान्तःकरणे
अकचटतपादिवर्णे अखण्डैकरसपूर्णे

✠ ✠ ✠ ✠ ✠

# १० रूपमु जूचि (चौक वर्ण)

## रागाङ्ग रागं ८: जनतोडि
## आदि ताळं

पल्लवि

रूपमु जूचि वलचि वच्चितिनि
कोपमु सेतुरा सामि इन्त

अनुपल्लवि

तापत्रय हरुडै वेलयु श्री
त्यागराज सामी इदेमि

चरणम्

मारकोटि सुन्दराकार

✠ ✠ ✠ ✠ ✠